हतं मयाकृष्टमशेषमस्यस्वस्थो भवत्येष यथा
वचो हरेः ५४ शान्तिरस्तु शिवं चास्तु दुष्टमस्य प्र
णश्यतु यदस्य दुरितं किंचित्तत्क्षिप्तं लवणा
र्णवे ५५ स्वास्थ्यमस्य सदैवास्तु हृषीकेशस्य
कीर्त्तनात् यत एवागतं पापं तत्रैव प्रतिगच्छतु ५६
एतद्रोगादिपीडासु जन्तूनां हितमिच्छता वि
ष्णुभक्तेन कर्त्तव्यं अपामार्जनकं परं ५७ अने
न सर्वदुःखानि प्रशमं यान्ति सर्वदा सर्वभूतहि
तार्थाय कुर्यादस्मात्सदैव हि ५८ यश्चैतद्धारये
द्विद्वांश्रद्धाभक्तिसमन्वितः ग्रहानशेषपीडा
दीन भूतानि च राक्षसाः ५९ निरपेक्षैः प्रकर्त्तव्यं
नान्यथा सिद्धिमाप्नुयात् पवर्ताप्येतां चैव द
दाति परमां गतिं ६० इति श्रीभविष्योत्तरपु
राणे पुलस्त्यदाल्भ्यसंवादे अपामार्जनस्तोत्रं
समाप्तं शुभमस्तु

© Dharmartha Trust J&K. Digitized by eGangotri

6

7

© Dharmartha Trust J&K. Digitized by eGangotri